श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ प्रारम्भस्तबकः प्रथमः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ प्रारम्भस्तबकः प्रथमः ॥

लक्ष्मी चरणराजीवलाक्षालक्षित वक्षसे।
विश्वसर्गादिलीलाय वेङ्कटब्रह्मणे नमः ॥ **1.1** ॥

असदृशमरुणाब्जदृशं प्रस्विन्नपयोधरस्फुरन्मूर्तिम्।
मनसि दधीमहि सततं मातारं मातरं च लोकानाम् ॥ **1.2** ॥

प्रातरम्बुजविडम्बिलोचनां मातरं त्रिजगतामुपास्महे।
शीतरम्यकरुणावलोकनैः या तरङ्गयति मङ्गलानि नः ॥ **1.3** ॥

आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
मध्यस्थैरिह नाथयामुनमुखैर्मान्यैः सनाथीकृतम्।
क्षीराम्भोधिसुतापयोधरपयः पूरा इवोदित्वराः
यद्वाचां विसरा जगन्ति नितरामुज्जीवयन्ति स्वयम् ॥ **1.4** ॥

भुवनजननीं तुष्टूषन्ती पुरो रसनाऽधुना
रचयति नमो वाचे प्राचेतसाननजन्मने।
जनकतनया दिव्योदन्तामृत द्रव वर्षिणीं
जगति कवयः श्राव्यं काव्यं गृणन्त्यवलम्ब्य याम् ॥ **1.5** ॥

पराशरमुनीशितुः प्रणतिकर्म कुर्मस्तराम्
अहीनगुणशोभितैरमृतसाधनोत्कण्ठिभिः।
यदीयकृतिसिन्धुना विमथितेन यत्नाद्बुधैः
प्रकाशमिह नीयते परमपूरुषप्रेयसी ॥ **1.6** ॥

दद्यादद्य कुदृष्टिसर्पगरुडस्त्रय्यन्तविद्यागुरुः
    श्रीमान् वेङ्कटनाथदेशिकमणिः श्रेयांसि भूयांसि नः।
दत्से दृष्टिलवेन देवि भजतां या त्वं विभुत्वं रमे
    तस्या हन्त तवापि येन विभुता सुष्ठु प्रतिष्ठापिता ॥ **1.7** ॥

शीतज्योतिः शिखरिनगरीसागराम्भोधरादेः
    जल्पं जल्पं जलधितनये हन्त मिथ्यासमृद्धिम्।
निर्विण्णा मे ननु भगवती भारतीयं त्वदीयं
    स्तोत्रं चित्रं स्फुरति जननि स्वैरमारब्धुकामा ॥ **1.8** ॥

मदान्धक्षोणीपत्यपसदमनः प्रीणनकृते
    नमस्कारान् ब्रूमो भगवति चमत्कारवचसे।
विधात्रीमानन्दं विपुलमिह चाऽमुत्र च तव
    स्तुतिं प्रस्तौत्वंहोभरनिरसनायाऽद्य रसना ॥ **1.9** ॥

तत्तादृग्रचनाविदग्धरसनाकण्डूतिनिर्धूतये
    केचिन्नीचविचारगोचरगिरो गृध्नन्ति मिथ्याकृतिम्।
स्वं वाग्ब्रह्म पुराणजिह्मगशिरः कम्पावहं पावनी
    कर्तुं देवि वयं पुनस्तव कथारम्भाय जृम्भामहे ॥ **1.10** ॥

शय्या शब्दगुणानुशासनचणा छन्दोमयं वाहनं
    सोदर्यस्तु कलानिधिस्तव रमे सूनुश्च वाणीपतिः।
तस्यास्ते पुरतः स्तवं मितमतिः प्राज्ञोचितं श्रावयन्
    गुञ्जाविक्रयिणः श्रयामि पदवीं माणिक्यपुञ्जापणे ॥ **1.11** ॥

कवीनां प्रत्नानां कबळितसुधास्वादिममदैः
    अनूचीनैः स्तोत्रैः श्रुतिजडिमभाजो जननि ते।
अजामित्वायैव स्तवमिममकूपारतनये
    वियाता ग्रथ्नीमो विहसनपदैः कैरपि पदैः ॥ **1.12** ॥

विद्वद्भ्यः स्वदमानया यदनया विश्वाम्ब नाधीयते
स्तुत्या ते सुखमज्ञचेतसि दृषत्प्राये न दूये ततः।
गान्धर्वी हि पुरन्दरादिशिरसामान्दोलयित्री चिरं
गीतिः सा बधिरान्न नन्दयति चेत् किं छिन्नमेतावता ॥ **1.13** ॥

वक्तुं नैव चतुर्विधा श्रुतिरसावीष्टे न चाष्टश्रुतिः
नो चक्षुः श्रुतिरप्यहो तव गुणान् नारायणप्रेयसि।
स्तोतुं त्वामपि तामहं व्यवसितो दूरं हनूमन्मुखैः
दुर्लङ्घ्यं जलधिं तरीतुमनसः पङ्गोर्दधे चापलम् ॥ **1.14** ॥

गर्वद्दुर्वसुधापतिस्तुतिपरव्याहारकूहान्धता
निर्विण्णाशय एष वेङ्कटकविः पङ्केरुहावासिनि।
अद्य त्वद्गुणवर्णनामृतरसैरानन्दितुं जृम्भते
चिञ्चापर्णरसावसन्नरसनः पुण्ड्रेक्षुसारैरिव ॥ **1.15** ॥

नाहं जाने नवरसगतीर्नार्थमक्षुण्णमन्यैः
नालङ्कारानपि च न वचोगुम्भगम्भीरिमाणम्।
स्तोतुं मातस्तदपि भवतीं त्यक्तलज्जो यतेऽहं
मन्तुं किं तु प्रथितकरुणा क्षन्तुमर्हस्यमुं त्वम् ॥ **1.16** ॥

चक्षुष्मन्तश्चरणकमले चक्षुषा श्रोत्रवन्तः
श्रोत्रे भूमेर्जननि जगतां जन्मवन्तोऽपि न स्मः।
वक्त्राण्यासन् भगवति न षट् पञ्च चत्वारि वा नः
कस्मादस्मान्न हसतु जनः स्तोष्यतस्त्वद्गुणौघम् ॥ **1.17** ॥

अभूमिस्त्वद्भूमा जननि जरतीनामपि गिराम्
असौ कस्मादस्मादृशकृशमनीषोक्तिविषयः।
अशक्यानामौर्वाग्निभिरपि निपातुं निधिमपाम्
अपारं तं पातुं मशकशिशुकः किं प्रभवति ॥ **1.18** ॥

प्रकृष्यन्तामस्मत्परमितरकाले विधिमुखाः
    वयं मातस्ते वा तव नुतिदशायां समधियः।
निकर्षोत्कर्षौ स्तां निशि तु शशिखद्योतमहसोः
    दिवा को वा भेदो दिनकरकरव्रातजटिले ॥ **1.19** ॥

वाग्भिः कोरकितानि ते रचयतः स्तोत्राणि वाणीपतेः
    अस्माकं सुमितां स्तुतिं कलयतामप्यम्ब तुल्यं फलम्।
कौबेरीं श्रियमानशे बहुतरैः कश्चित्तपोभिश्चिरात्
    एनामाशु कुचेल एव जगृहे धानाप्रदानादपि ॥ **1.20** ॥

आसन् धन्यतमाः गुणांस्तव बहूनास्वाद्य शक्रादयो
    गृह्णन्तोऽपि गुणार्णवामृतकणान्मातः कृतार्था वयम्।
आचामन्ति सुधाझरान् सुमनसो द्वित्रांश्चकोराः करान्
    ऐणाङ्कानविशेषमार्तिशमनं तत्रोभयेषामपि ॥ **1.21** ॥

देवि श्रीर्वृषशैलदेवदयिते दाक्षिण्यपुण्यक्षिते
    मातः साहसतस्तव स्तवमिमं कर्तुं प्रवृत्तस्य मे।
उन्मीलन्तु परं गिरस्तव करालङ्कारपङ्केरुह -
    प्रेङ्खत्तुङ्गषडङ्घ्रिसङ्घ विसरज्झङ्कारशङ्काकराः ॥ **1.22** ॥

पद्यानां दशभिर्यदस्तुत शतैस्त्वत्प्रेयसः पादुकां
    त्रय्यन्तार्यगुरुः परो हयमुखस्तत्राम्ब ! को विस्मयः।
स्तोकप्रज्ञमतीव मूकमपि मां श्लोकैः सहस्रेण ते
    स्तोतारं समवेक्ष्य सूक्ष्ममतिभिः कस्मान्न विस्मीयते ॥ **1.23** ॥

मन्ये सत्स्वपि वाङ्मयेषु विदुषामन्येषु धन्यैर्बुधैः
    उक्तिर्मे भुवि देवि तावकगुणस्पर्शादुपादीयते।
भद्रे त्वद्रमणप्रशस्तचरणद्वन्द्वैकसंसर्गतो
    भर्गः स्वर्गधुनीं बिभर्ति शिरसा भूयस्सु सत्स्वम्बुषु ॥ **1.24** ॥

तव स्तोत्रे मन्दाः कतिचिदतिचित्रेऽपि कमले
न विन्दन्त्यानन्दं यदि तदपि न म्लायति मनः।
सृजेदेव स्रष्टा स किल विपुलेऽस्मिन् क्षितितले
चमत्कारानन्दानुभवचतुरान् द्वित्रिचतुरान् ॥ **1.25** ॥

सुचारुमधुवीचिकारसमुचो वचोदेवता -
कुचामृतकचाकचिप्रथनचातुरीमेदुराः।
नराः सततमिन्दिरागुणकथासुधादोहिनीः
उपाध्वमिह वेङ्कटाध्वरिकवेरुदारा गिरः ॥ **1.26** ॥

स्वैरं प्ररोहयतु पद्यसहस्रमेतत्
दासस्य मे वदनसीम्नि तवाऽवलोकः।
यः क्वापि हन्त सकृदञ्जलिबन्धभाजि
जन्तौ जगज्जननि सौति सहस्रमक्ष्णाम् ॥ **1.27** ॥

पङ्कजनिलये स्तोत्रं
वेङ्कटकविगीतमेतदविगीतम्।
किङ्करकृतमिति कृपया
त्वङ्कलयितुमर्हसि प्रसीदन्ती ॥ **1.28** ॥

रसिकालिभिरास्वाद्यं रम्यं श्रीकरविलसदलङ्करणम्।
विकसतु सूर्यालोकात् पद्यसहस्रं सहस्रपत्रमिव ॥ **1.29** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रारम्भस्तबकः प्रथमः ॥